# मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

Rashtriya Sanskrit Sansthan

(Deemed University)

नवदेहली

## व्याकरणाचार्यप्रवेशपरीक्षा

## आदर्शप्रश्नपत्रम्

## (Model Paper)

समयः – होरात्रयम् पूर्णाङ्काः – 100+100

परीक्षार्थिनाम ......................................................................

अनुक्रमाङ्कः ......................................................................

परीक्षाकेन्द्रनाम ......................................................................

परीक्षार्थिनः हस्ताक्षरम् ......................................................................

स्वाध्यायकेन्द्रसमन्वयकस्य हस्ताक्षरम् ......................................................................

निर्देशाः

- प्रवेशपरीक्षाप्रश्नपत्रे द्वौ भागौ भवतः । उभावपि भागौ तिसृषु घण्टासु समाधेयौ । परीक्षा पूर्वाह्णे एकादशवादनतः अपराह्णे द्विवादनं यावद् भवति ।
- **प्रथमभागे लघूत्तरीयप्रश्नाः भवन्ति ।**
- सर्वान् प्रश्नान् समाधत्त ।
- **द्वितीयभागे विवरणात्मकप्रश्नाः भवन्ति ।**
- **द्वयोरपि भागयोः प्रत्येकं ४० अङ्काः परीक्षोत्तीर्णतायै भवद्भिः प्राप्तव्याः ।**

## व्याकरणम्

### प्रथमो भागः

**निर्देशः – अधोलिखितानां प्रश्नानामुत्तरं यथास्थानं लिखत ।** 01x100 = 100

1. नमस्कृत्य इत्यत्र प्रत्ययः कः ?
2. शकारस्य उच्चारणस्थानं किम् ?
3. इण् प्रत्याहारः केन णकारेण गृह्यते ?
4. प्लुतसंज्ञायाः प्रयोजनं किम् ?
5. पुर्वत्रासिद्धमिति कीदृशं सूत्रम् ?
6. पदान्तात् टवर्गात् परस्य स्तोः ष्टुत्वनिषेधनिधायकं सूत्रं किम् ?
7. "इसुसो सामर्थ्ये" सूत्रे सामर्थ्यं कीदृशम् ?
8. गीर्पतिः इत्यत्र रेफः कस्यापवादः ?
9. सर्वादयश्च कति ?
10. विकल्पेन शसादौ पादशब्दस्य पदादेशविधायकं सूत्रं किम् ?
11. पदसंज्ञाविधायकानि सूत्राणि कति ?
12. भसंज्ञाविधायकं सूत्रं किम् ?
13. रैशब्दस्य हलादिविभक्तौ परतः आत्वविधायकं सूत्रं किम् ?
14. षढोः क सि इति सूत्रेण किं विधीयते ?
15. लक्ष्मी इत्यत्र हलङ्याादिसूत्रेण सुलापः कुतः न भवति ?
16. दधिशब्दस्य सप्तमीविभक्त्येकवचने रूपद्वयं प्रदर्शयत ।
17. "दादेधातोर्धः इति सूत्रं किं विधत्ते ?
18. अष्टन्शब्दस्य हलादिविभक्तौ परतः आत्वविधायकं सूत्रं किम् ?
19. "स्त्रियाम्" इति सूत्रस्य अधिकारावधिः कियत्पर्यन्तम् ?
20. अष्टका अष्टिका एतयोः भेदं प्रदर्शयत ।

21. अपादानादिविशेषैः अविवक्षितं कारकं किं भवति ?

22. "अन्तरा त्वां हरिः" अत्र वाक्ये द्वितीया केन सूत्रेण ?

23. अशिष्टव्यवहारे दाणः प्रयोगे कस्मिन्नर्थे तृतीया ?

24. "षष्ठी शेषे" सूत्रे शेषपदार्थः कः ?

25. अधेः कर्मप्रवचनीयसंज्ञाविधायकं सूत्रं किम् ?

26. समया ग्रामम् इत्यत्र अव्ययीभावसमासः कुतो न ?

27. समृद्धिसम्पत्योः भेदः कः ?

28. "शङ्कुलाखण्डः" इति उदाहरणं कस्य सूत्रस्य ।

29. "कृत्यैर्ऋणे" इत्यस्य उदाहरणं किम् ?

30. "षाण्मातुरः" इत्यत्र समासः केन ?

31. "व्याघ्री" इत्यत्र समासविधायकं सूत्रं किम् ?

32. उपदशाः इत्यस्य विग्रहवाक्यं प्रदर्शयत ।

33. युवतिः जाया यस्य इति विग्रहे रूपं किम् ?

34. तापसपर्वतौ इत्यत्र तापसशब्दस्य पूर्वनिपातः केन ?

35. वाक्त्वचम् इत्यस्य विग्रहं प्रदर्शयत।

36. देवानांप्रियः इत्यत्र षष्ठ्याः अलुक् कस्मिन्नर्थे ?

37. "तद्धितेष्वयामादेः" इत्यनेन किं विधीयते

38. गोत्रसंज्ञाविधायकं सूत्रं किम् ?

39. वैयासकिः इत्यत्र ऐजागमविधायकं सूत्रं किम् ?

40. कन्यायाः कनीन च सूत्रेण किं विधीयते ।

41. त्रल्प्रत्यविधायकं सूत्रं किम् ?

42. राष्ट्रियः इत्यत्र प्रत्ययः कः ?

43. इसुसुक्तन्तात्कः इति सूत्रेण किं विधीयते ?

44. छन्दोमात्रगोचरः लकारः कः ?

45. परस्मैपदसंज्ञाविधायकं सूत्रं किम् ?

46. प्रथमपुरुषः कदा भवति ?

47. अपृक्तसंज्ञाविधायकं सूत्रं किम् ?

48. टितो लस्य थासः से विधायकं सूत्रं किम् ?

49. आम: परस्य लेः लुक् केन सूत्रेण ?

50. "उरत्" इति सूत्रेण किं विधीयते ??

51. घुसंज्ञाविधायकं सूत्रं किम् ?

52. हलन्तेषु अनुदात्ताः धातवः कति ?

53. मन्थ विलोडने इत्यत्र लोडने इत्यस्य अर्थः कः ?

54. आयादयप्रत्यया: कदा भवन्ति ?

55. सन्वद्भावविधायकं सूत्रं किम् ?

56. "इट ईटि" सूत्रार्थः कः ?

57. पादीनां पिबाद्यादेशाः कदा भवन्ति ?

58. शिद्भिन्ने प्रत्यये परे उपदेशे एजन्तस्य धातोः आत्वं केन ?

59. घुसंज्ञाविधायकं सूत्रं किम् ?

60. अधिजगे इति रूपं कस्य धातोः ?

61. "श्लौ" इति सूत्रेण किं विधीयते ?

62. वव्रश्च इत्यत्र धातुः कः ?

63. प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोः णिच् केन सूत्रेण ?

64. ह्वः सम्प्रसारणम् इत्यनेन सम्प्रसारणं कदा विधीयते ।

65. सन्प्रत्यविधायकं सूत्रं किम् ?

66. यङः लुग्विधायकं सूत्रं किम् ?

67. विरमति इत्यत्र परस्मैपदं केन सूत्रेण ?

68. "कृत्याः" इत्यस्य अधिकारविधिः कियत्पर्यन्तम् ?

69. कृत्यक्तखलर्याः कयोरेवार्थयोः भवन्ति ?

70. पचेलिमा इत्यत्र प्रत्ययः कः ?

71. धातोः विधीयमानौ ण्वुल्तृच्प्रत्ययौ कस्मिन्नर्थे भवतः ?

72. नर्तकः इत्यत्र प्रत्ययः कः ?

73. "कर्मण्यण्" इति सूत्रेण किं विधीयते ?

74. उपपदसंज्ञाविधायकं सूत्रं किम् ?

75. उपनिषत् इत्यत्र प्रत्ययः कः ?

76. कयोः निष्ठा संज्ञा विधीयते ।

77. पच् धातोः निष्ठा क्तप्रत्ये रूपं किम् ?

78. सत्संज्ञाविधायकं सूत्रं किम् ?

79. जागरूकः इत्यत्र प्रत्ययः कः ?

80. तुमुन्ण्वुलौ कस्मिन्नर्थे भवतः ?

81. भावो नाम कः?

82. वेपथुः इत्यत्र प्रत्ययः कः ?

83. "उपसर्गे घो: कि:" इत्यस्य उदाहरणं प्रदर्थयत ।

84. "स्त्रियां क्तिन्" इति सूत्रेण विधीयमानः क्तिन्प्रत्ययस्य अर्थः कः ?

85. प्रकृत्य इत्यत्र ल्यबादेशस्य स्थानी कः ?

86. "तितुत्रथसिसुसरकसेषु च" सूत्रे कति प्रत्यया: निर्दिष्टाः सन्ति ?

87. शुभंयुः इत्यत्र प्रत्ययः कः ?

88. हयवरट् सूत्रे हकारोपदेशः किमर्थः ?

89. "स्थानेयोगा" इत्यस्य विग्रहः कथम् ?

90. "तस्मादित्युत्तरस्यादेः" इति कुतः न सूत्रितम् ।

91. अक्षौहिणी इत्यस्य विग्रहः कः ?

92. "अन्तादिवच्च" सूत्रं केन गतार्थतां भजते ?

93. "दूराद्धूते च" सूत्रे हूतं नाम किम् ?

94. शब्दानुशासनं नाम किम् ?

95. शब्दानुशासनस्य किं प्रयोजनम् ?

96. कतिभिः प्रकारैः विद्या उपयुक्ता भवति ?

97. ऋऌक् सूत्रे ऌकारोपदेशः किमर्थः ?

98. वृद्धिरादैच् सूत्रे चकारस्य कुत्वं कस्मान्न भवति ?

99. सर्वादीनि इत्यत्र तद्गुणसंविज्ञानस्वीकारे किं प्रमाणम् ?

100. विप्रतिषेधे किं कार्यम् ?

## द्वितीयो भागः

**अ. अधोनिर्दिष्टानां केचन षट् प्रश्नाः समाधेयाः** (06 x 05 = 30)

1. हलन्त्यमित्यत्र अन्योऽन्याश्रयम् उद्भाव्य परिहरत ।
2. पूर्वात्रासिद्धम् इति सूत्रं व्याख्यात ।
3. गौः इत्यत्र कः शब्दः ?
4. सिद्धे शब्दार्थसम्बन्धे विषदयत ।
5. स्तोः श्चुना श्चुः सूत्रं मनोरमादिशा व्याख्यात ।
6. "इको गणवृद्धीः" सूत्रे इग्ग्रहणप्रयोजनं विशदयत ।
7. तच्छिवः, युष्माकम् इति रूपद्वयं साधयत ।
8. नामि, नदीभिश्च इति सूत्रद्वयं व्याख्यात ।

**आ. अधोनिर्दिष्टेषु केचन पञ्चप्रश्नाः समाधेयाः ।** (05 x 08 = 40)

1. व्याकरणाध्ययनस्य आनुषङ्गिकप्रयोजनानि लिखत ।
2. "भूवादयो धातवः" सूत्रं मनोरमादिशा व्याख्यात ।
3. "मुखनासिकावचनोऽनुनासिकः" इति सूत्रं महाभाष्यरीत्या व्याख्यात ।
4. "शब्दानां ज्ञाने धर्मः उत प्रयोगे" महाभाष्यदिशा व्याख्यात ।
5. "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" सूत्रं व्याख्यात ।
6. गोपयामास, जक्षतुः रूपद्वयं साधयत ।
7. अद धातोः लिटि, गम् धातोः लुटि, मुच् धातोः लुटि चुर् धातोः लुङि रूपाणि लेख्यानि ।

8. पण्डितम्मन्यः, तस्थुषः इत्यनयोः सिद्धिः कार्या ।

**इ. अधोलिखितेषु त्रीन् प्रश्नान् समाधत्त ।** (03 x 10 = 30 )

1. “एत्येधत्यूठ्सु” सूत्रं प्रौढमनोरमादिशा व्याख्यात ।
2. “वृद्धिरादैच्” इति सूत्रं महाभाष्यदिशा व्याख्यात ।
3. चतुर्णां सिद्धिः कार्या – षण्णाम्, हर इह, देहि, बभूव, पाणिनीयम्, हित्वा
4. “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा” इति सूत्रं व्याख्यात ।
5. चतुर्णां सिद्धिः कार्या – इन्द्राणी, नखनिर्भिन्नः, अजीगणत्, स्तुत्यः, वैयाकरणः, रूपवद्भार्यः ।